पुनः मरीचीमिश्रैर्मुनिभिः सार्द्धकंथठादनुवभूवः विधेनरदनश्चकंठदेशाद्बभूव स नारद
श्चेतिविख्यातोमुनींद्रस्तेनहेतुना यपुत्रस्यतमोधातुर्वभूवमुनिपुंगव तेनप्रचेताइतिच
नामचक्रेपितामहः वभूवधातुर्यपुत्रः सहसादक्षपार्श्वतः सर्वकर्माणिदक्षश्चतेनदक्षः
प्रकीर्त्तितः वेदेषुकर्दमःशब्दःच्छायायांवर्त्ततेस्फुटं वभूवकर्दमादःकर्दमस्तेनकीर्त्ति
तः क्रतुसंघास्यवालेनकृतोजन्मांतरेधुना ब्रह्मपुत्रेपितन्नाम्नाक्रतुरित्यभिधीयते॥
प्रधानांगंमुखंधातुस्ततोजातस्यबालकः इस्तेजसिनचलोप्यंगिरास्तेन।कीर्त्तितः वशी
भूतस्यशिष्टस्यजातःसद्योहिबालकः अतःप्रियःसधातुस्यवशिष्टस्तेनकीर्त्तितः वालोऽ ॥७८॥
त्यरुणवर्णस्यजातःसद्योतितेजसा प्रज्वलन्नईतपसाचारुणीतेप्रकीर्त्तितः हंसस्या

त्मावंशोयस्ययोगेनयोगिनोध्रुवं वालःपरमयोगीचस्तेहंसीप्रकीर्त्तितः संततंयत्नतस्यत
पःसुबालकस्यच प्रकीर्त्तितोयतिस्तेनसंयतःसर्वकर्मसु पुनस्तपःसुवेदेषुवर्त्ततेनूःस्फु
टेपिच स्फुटंतपःस्वरूपस्यपुलहस्तेनवालकः पुलहस्तपःसमुहस्यपस्यास्तिपूर्वजन्मना
तपसंघस्वरूपस्यपुलहस्यस्तेनवालकः त्रिगुणायांप्रकृत्यांत्रिवेस्त्रवैस्यप्रवर्त्ततेतपोभि
क्तिममायस्यतेनवालोतिरुच्यते जटावह्निशिखारूपाःपंचसंतिचमस्तके तपस्तेजोभवाय
स्यसचपंचशिखःस्मृतः अपांतरमेदेवोतपस्तेपेनजन्मनि अपांतरतमानामधिशोस्तेन
प्रकीर्त्तितः(तपससोजसावालोद्दीप्तिमा) स्वयंतपःसमाप्नोतिवाहयेत्यायये स्वुरान् उवुः
समर्थस्तपसिवोढुंस्तेनप्रकीर्त्तितः तपससोजसावालोद्दीप्तिमान्सततंमुने तपःसुरोचतेचि
तंरुचिस्तेनप्रकीर्त्तितः कोपकालेवमुर्वुर्यस्त्रष्टरेकारुशाभ्रुताः रोदनादेवरुद्राख्यकोपिता

सेनहेतुना॥ ॥शौनक उवाच॥ रुद्रेष्वेकतमोवामोमहेशश्चइतिभ्रमः। भवान्पुराणतत्त्वज्ञः
संदेहंछेत्तुमर्हति॥ सौतिरुवाच॥ विष्णुःसत्वगुणःपाताब्रह्मारजोगुणःतमोगुणास्तेरुद्राश्चदु
र्निवाराभयंकराः। कालाग्नीरुद्रःसंहर्त्तातेष्वेकःशंकरांशकः। शुद्धसत्वस्वरूपश्चशिवश्चशि
वदःसतां। अन्येकृष्णस्यचकलास्तावंशौविष्णुशंकरौ। समौसत्वस्वरूपौद्वौपरिपूर्णतमस्यच
उक्तंरुद्रोद्भवेकालेकथंविस्मरसिद्विज। माययामोहिताःसर्वेमुनीनांचमतिभ्रमः। सनकश्च
सनंदश्चसनंदश्चतृतीयश्चसनातनः। सनत्कुमारोभगवांश्चतुर्थोब्रह्मणःसुतः। ब्रह्मापुत्रं
पूर्वंभूतानुवाचतेनसेहिरे। तेनप्रकोपितोपितोधातारुद्राःकोपोद्भवामुने। सनकश्चसनंद
श्चतृतीयश्चसना- तेह्यानंदवाचकौ। आनंदितोचबालौद्वौभक्तिपूर्णतमौसदा। सना ॥७९॥
तश्चश्रीकृष्णोनित्यंपूर्णतमःस्वयं। तद्भक्तस्तत्समःसत्यंतेनबालःसनातनः। नततनित्य

वचनःकुमारःशिशुर्वाचकःसनत्कुमारंतेनेममुवाचकमलोद्भवः। ब्रह्मणोबालकानांचअत्प
त्तिःकथितामुने। सांप्रतंनारदाख्यानंश्रूयतांचयथाक्रमं॥ ॥इतिश्रीब्रह्मवैवर्त्तेमहापुराणे
ब्रह्मखंडेसौतिशौनकसंवादेब्रह्मसुतश्चुत्पत्तिकथनंनामद्वाविंशतितमोऽध्यायः॥ ॥सौतिरुवा
च॥ ॥सृष्टासृष्टिविधानेचनियोज्यसर्वबालकान्। नारदंप्रेरयामाससृष्टीकर्तुंचशौनक। हितं
सत्यंवेदसारंपरिणामसुखावहं। उवाचनारदंब्रह्मावेदवेदांगपारगं॥ ब्रह्मोवाच॥ एहिवत्सकु
लश्रेष्ठनारदप्राणवल्लभ। ज्ञानदीपशिखाज्ञानतिमिरक्षयकारक। सर्वेषामपिवंधूनांज
नकःपरमोगुरुः। विद्यादातामंत्रदाताद्वौसमौचपितुःपरौ। तवहंजनकःपुत्रविद्यादाताचपा
लकः। मदाज्ञयाचमत्प्रीत्याकुरुदारपरिग्रहं। सचशिष्यःसोपिपुत्रोयआज्ञांपालयेद्गुरोः। न
हिमंतस्यमूढस्ययोगुरोरवचस्करः। सपंडितःसचज्ञानीसक्षेमीसचपुण्यवान्। गुरोर्वचस्क(

॥८७॥ रोयोऽस्ति स इमं तस्य पदे पदे सर्वेषामाश्रमाणां च प्रधानः पुण्यवान् गृही ॥ स पुत्रपौत्रयुक्तं च मंदि
रं तपसः फलं ॥ पितरः सर्वकाले च तिथिकाले च देवता ॥ सर्वे गृहस्थमायांति नित्यं सुखं पुण्यं स्वर्ग
भोगः परत्र च ॥ जीवन्मुक्तो गृहस्थश्च स्वधर्मपरिपालकः ॥ यशस्वी पुण्यवांश्चैव कीर्तिमान् धनवा
न् सुखी ॥ यशस्वी कीर्तिमान् योऽस्ति मृतो जीवति संततं ॥ यशःकीर्तिविहीनो हि जीवन्नपि मृतो हि
सः ॥ ब्रह्मणो वचनं श्रुत्वा नारदो मुनिसत्तमः ॥ उवाच विनयं भीतः शुष्ककंठोष्टतालुकः ॥ नार
द उवाच ॥ एकदा वाग्विरोधेन वां त्वयोस्तात पत्रयोः ॥ हानिर्बभूव दैवेन महती च यशस्करी ॥
मया प्राप्तं च त्वच्छापात् धा गांधर्वशोद्भमेव च ॥ जन्म कर्म च मत्तुशापात्त्वमपूज्यो भवेऽभवः ॥ ब
भूव शापमुक्तो मे कालांते भविता विधे ॥ रोषाय कल्प्यते शास्त्रं द्विरोधेन गुणाय च ॥ स पिता गुरु ॥८७॥
बंधुः स पुत्रः स सदा स्वरः ॥ यः श्रीकृष्णपादपद्मे दृढां भक्तिं कारयेत् ॥ अस ॰ द्दत्तनिवाना

नाऽर्हंति यदि बालका ॥ निवर्त्तयति तानेव स पिता करुणानिधिः ॥ कारयित्वा कृष्णपादे भक्ति
मार्गं च यः पिता ॥ अन्यस्मिन्विषये पुत्रं स किं हंत प्रवर्त्तयेत् ॥ दारग्रहो हि दुःखाय केवलं न सुखाय
च ॥ तपः स्वर्ग न भक्ति मुक्ति कर्मणां व्यवधायकः ॥ योषितास्त्रिविधा ब्रह्मन् गृहीनां मूढचेतनां ॥ साध्वी
भोग्या च कुलटास्तासु सर्वाः स्वार्थतत्परा ॥ परलोकभिया साध्वी तथेह यशसात्मनः ॥ कामस्नेहाच्च
कुरुते भर्तुः सेवां च संततं ॥ भोग्या भोगार्थिनी शश्वत् कामस्नेहेन केवलं ॥ कुरुते कांतसेवां च
न च भोगाद्दते ह्रलं ॥ वस्त्रालंकार संभोगं सुस्निग्धाहारमुत्तमं ॥ यावत्प्राप्नोति सा भोग्या तावच्च व
शगा प्रिया ॥ कुलांगारसमा न प्रसमा नारी कुलटा कुकर्माशिनी ॥ कपटात्कुरुते सेवां स्वामिनो न
च भक्तितः ॥ सदा पुंयोगमाशंसुर्मनसा मदनातुरा ॥ आहारादधिकं जारं प्रार्थयंती नवं नवं ॥ जा
रार्थे स्वपतिं तातं हंतुमिच्छंति पुंश्चली ॥ यस्या योषित्स्व सेम्मूढो जीवनं तस्य निष्फलं ॥ कथिता योः

८१ षितःसर्वाउत्तमाधममध्यमाः स्वात्मारामाविजानंतिमनस्त्वांमानपंडितां हृदयंखुरधारानंशार
त्सुधासमंमुखं सुधासमंसुमधुरंवचनंस्वार्थसिद्धये प्रकोपेविषतुल्यंतदन्वंहंशीलकुत्सितं दुर्ज्ञे
यंतदभिप्रायंनिगुढंकर्मकेवलं सदातामामविनयंप्रवलंमाहसःपरं दार्थ्योत्कर्षंछलोत्कर्षंश
श्वन्मायादुरत्यया पुंसश्चाष्टगुणःकामः शास्वकामोजगद्गुरोः आहारोद्विगुणोनित्यंनैष्ठुर्यंच
चतुर्गुणं कोपःपुंसःषड्गुणाश्चव्यवसायश्चनिश्चितं यत्रेमेदोषनिवहाकास्थातत्रपितामह
काक्रीडाकिंसुखंपुंसोविण्मूत्रपूयवेश्मनि तेजःप्रणष्टंसंयोगेदिवालापेयशःक्षयं धनंक्षयति
संप्रीतौवात्याशक्तौवपुःक्षयं साहित्येपौरुषंनष्टंकलहेमात्यनाशकं सर्वनाशश्चविश्वासेब्रह्म
न्माधुकिंसुखं यावद्धनीचतेजस्वीसश्रीकोयोग्यतापरः तुमानारीवशीवर्त्तुंसमर्थस्तावदेव ८१
हि रोगीनैःस्वनिर्धनंवृद्धंयोषित्त्यजेत्परंप्रियं लोकाचारभयात्तस्मैदद्यात्पारमल्पकं इत्येवं

कथितंसर्वंब्रह्मन्नावगमोयथा सर्वज्ञानीसिसर्वज्ञस्वात्मारामेश्वरोभवान् अनुग्रहंकुरुविभो
विदायंदेहिसांप्रतं कृत्स्नभक्तिंप्रार्थयामित्वपिकल्पतरौपरे इत्युक्त्वानारदस्तत्रधृत्वातातपदांर
बुजं आज्ञापयाचेपितरंगंतुंतपसिमंगले पुटांजलिपुटोनम्रोभक्तिनम्रात्मकंधरः कृत्वाप्रद
क्षीणंनत्वाब्रह्माणंगंतुमुद्यतः गच्छंतंतनयंदृष्ट्वाविधाताजगतांमुने रुरोदोच्चैर्मुक्तकंठंमहा
सांसारिकोयथा क्रोडेधृत्वासमालिंग्यचुचुंबचपुनःपुनः चिरंबहुस्मितिकृत्वाचवासयामासजानु
नि स्वात्मारामेश्वरोब्रह्मायोगींद्राणांगुरोर्गुरुः नेदंशोदुःसहशोकविच्छेदोदुःसहोत्यणां कातरः
पुत्रभेदेनमोहितोविष्णुमायया शोकार्त्तोवत्कुमारेभ्यःसुतंसंबोध्यशौनक ।। ।।इतिश्रीब्रह्मवै
वर्त्तेमहापुराणेब्रह्मखंडेब्रह्मनारदसंवादेत्रयोविंशतितमोध्यायः ।। ।।ब्रह्मोवाच।। ।।
त्वांवत्सतपसेगच्छकिंमेसंसारकर्मणि अहंयास्यामितेलोकंविरज्जाकृष्णसमीश्वरं सनकश्चस

॥८२॥

नेरश्चत्रतीयश्च सनातनः सनत्कुमारो वैरागी चतुर्थः पुत्र एव च। यतो हंसी चारुणी श्च वोढुं पंच
शिखस्तथा। पुत्रास्तपस्विनः सर्वे किं मे संसारकर्मणि। वचवस्फुरो मरीचिर्मे अंगिराश्चन्त्रगुस्तथा
रुचा वर्हिः कर्दमश्च प्रचेताश्च — तुर्मनुः। वसिष्ठो वशगः शंच सर्वे पूतसुते पुच। अन्येपि विवेकि
नो साध्याः किं मे संसारकर्मणि हिता नेतान्सनासु च प्रशंसितान् शोके वचनं श्रुमे। पारपर्य्यक्र
म परं चतुर्वर्गफलप्रदं। धर्मार्थकाममोक्षांश्च सर्वे वांछति पंडिताः। वेदप्रणिहितानेतन्सना
सुच प्रसंसितान्। वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्य्ययः। आदौ विप्रो यज्ञसूत्रं परिधाय सु
त्वं मध्ये। समधीत्य ततो वेदानददाति गुरुदक्षिणां। ततः प्रहृष्टकुलजां सुविनीतां समुद्वहेत्
त समाध्वीं कुलजा याश्च पतिसेवासु तत्परा। सद्वंशोदुर्विनीता च प्रमत्वेत्र कदाचन। आकरे पद्म ॥८२॥
रागाः संजन्म का च मणाः कुलः। असद्वंशप्रसूता या पित्रोर्दोषेण नारद। दुर्विनीता सा च दुष्टा

स्वतंत्रा सर्वकर्मसु। न कस्म दुष्टाः सर्वाश्च योषितः कमलालया। स्वर्वेश्यांशाश्च कुलटा असद्वंश—
मुद्भवाः। निर्गुणं स्वामिनं साध्वी सेवते च प्रशंसति। न सेवते च कुलटा प्रियं निंदति सद्गुणं। सा
धुः सद्वंशजां कन्यां प्रायत्नेन परिग्रहेत्। तस्यां पुत्रान्समुत्पाद्य वृद्धः स्तुतपसा व्रजेत्। वरं कृतव
हे वासः सर्पवक्रे च कंटके। एतेभ्यो दुःखदो वासः स्त्रिया दुर्मखया सह। त्वमधीतो मया वेदैर्मत्थं च
गुरुदक्षिणां। पुत्र देहि दमे चेह कुरु दारपरिग्रहं। तं च सत्कुलजातां च पर्वपत्नीं च माखती
विवाहं कुरु कल्याण कल्याने च दिने क्षणे। मनुवंशोद्भवस्येह संजयस्य गृहे सती। वल्कले जन्म
लब्ध्वा च कुरु ले भारते तपः। ग्रहणं कुरु वंतां रत्नमालां च कमलाकलां। भारते च नवेद्यर्थ जनां
नां तपसः फलं। आदौ न वेद्रहा लोको वा न प्रस्थस्ततः परं। ततस्तपस्वी मोक्षाय क्रमएष श्रुतो
श्रुतः। वैष्णवानां हरेरर्चा तपस्या च श्रुतो श्रुता। वैष्णवस्त्वं गृहे तिष्ठ कुरु कृष्णपदार्चनं। अंतर्वा

॥८३॥

ध्येहरिर्यस्यतस्यकिंतपसासुत ॥ नांतर्बाह्येहरिर्यस्यतस्यकिंतपसावृथा ॥ तपसाहरिराराधो
नान्यःकृष्णनविद्यते ॥ पत्रयत्रकृतंसर्वकृष्णसेवनंपरमंतप ॥ वत्समङ्जेनैनैवगृहेस्थिताहरि
नज ॥ गृहीणवमुनिश्रेष्टगृहीणांसर्वदासुखं ॥ कामिन्यासहसंभोगःसर्वभोगान्सुदुर्लभ ॥ तद
र्शनमुपस्पर्शवांछंत्येवमुमुक्षव ॥ सर्वस्पर्शसुखात्स्त्रीणामुपस्पर्शसुखंवरं ॥ ततःसुखन
मंपुत्रदर्शनंस्पर्शनंमुने ॥ सर्वेभ्यःप्रेयसीकांताप्रियातेनप्रकीर्त्तिता ॥ पुत्रप्रजायेतोकांताशा
तकांतापरःसुतः ॥ नास्तीपुत्रात्परोबंधुनास्तिपुत्रात्परोरःप्रिय ॥ सर्वेभ्योजयमन्विछेत्पुत्राद
कात्पराजयं ॥ नचात्मनोप्रियोयश्चतस्मादपिप्रियःसुतः ॥ ततःप्रियतमेपुत्रेन्यसेदात्यपरंध
नं ॥ इत्येवमुक्तासब्रह्माविररामचशौनक ॥ उवाचवचनंतातनारदोज्ञानिनांवरः ॥ नारदउ
वाच ॥ स्वयंविज्ञायसर्वार्थंमपुत्रंवेददर्शनं ॥ प्रवर्त्तयत्यसमान्मार्गेसदयालुःकथंपिताः ॥ ॥८३॥

जलबुद्बुदवत्सर्वसंसारमतिनश्वरं ॥ जलरेखायथामिथ्यातयाब्रह्मन्जगत्त्रयं ॥ विहायहरि
दासंचविषयेयन्मनश्चलं ॥ दुर्लभंमानवजन्मवभूवतस्यनिष्फलं ॥ कावाकस्यप्रियापुत्रोबंधुः
कोवानवार्णवे ॥ कर्माभिर्नियोजनाचतदपादयेवियोजना ॥ सुकर्माकारयेद्योहितन्मित्रंसपितागु
रुः ॥ विबुद्धिकारयेद्योहिस्मरिपुश्चकथंपिता ॥ इत्येवंकथितंतातवेदबीजंयथाक्रमं ॥ ध्रुवंतथापि
कर्त्तव्यंतवाज्ञापरिपालनं ॥ आदौयास्यामिभगवन्नरनारायणाश्रमं ॥ नारायणकथांश्रुत्वाक
रिष्येदारसंग्रहं ॥ इत्येवमुक्त्वासमुनिर्विररामपितुपुनः ॥ पुष्पवृष्टिस्तदुत्परितत्क्षणेनवभूव
ह ॥ क्षणंपितुःपरस्थित्वानारदोमुनिसत्तमः ॥ उवाचपुनरेवेदंवचनंमंगलप्रदं ॥ नारदोउवा
च ॥ देहिमेलक्ष्मंमंत्रंचयन्मनोवांछितंमम ॥ ततसंबंधिचयज्ज्ञानंयत्रतद्गुणवर्णनं ॥ तदाप
श्चात्करिष्यामित्वत्प्रीत्यादारसंग्रहं ॥ मानसेपरिपूर्णेचकार्य्यंकर्त्तुंपुमान्सुखी ॥ नारदस्यवचः

श्रुत्वाप्रहर्षंकमलोद्भवः। उवाचपुत्रंरेवेदंपुत्रंज्ञानविदांवर॥ ब्रह्मोवाच॥ पत्युर्मंत्रंपितुर्मंत्रंन
गृह्णीयाद्विचक्षणः। विरक्ताश्रमिणांचैवनपुत्रसुखदायकं। निषेकाल्लभ्यतेमंत्रोगुरुमंत्रोचका
मिनी। विद्यासुखंत्रयंदुःखंपुरुषैःस्वेच्छयानच। महेश्वरस्तवगुरुःप्राक्तनानःपुरातनः। गच्छ
वत्सशिवंशांतंशिवदंज्ञानिनांगुरुं। तत्रवैभगवन्मंत्रंज्ञानंलब्ध्वापुरातनात्। नारायणकथां
श्रुत्वाशीघ्रमागच्छमद्गृहं। इत्युक्त्वाजगताधाताविररामचशौनक। प्रणम्यपितरंभक्त्याशि
वलोकंययौमुनि॥ ॥इतिश्रीब्रह्मवैवर्त्तमहापुराणेब्रह्मखंडेसौतिशौनकसंवादेचतुर्विंश
तितमोऽध्यायः॥ ॥सौतिरुवाच॥ ॥ब्रह्मणाविप्रप्रवरोमुदान्वितोजगामशंभोःसदनंम
नोहरं। उर्द्धंध्रुवाद्योजनलक्षमीप्सितंरत्नाननिर्माणकृतंचशूलिना। निराश्रयंयोगबलेनर
क्षंमुनाधृतंविचित्रंविविधानमान्वितं। दृष्टंसुपुण्याश्रयसाधकेवरंमणींद्रसारैर्ज्वलितंदिवा

॥८४॥

निशं। मपूर्वमस्यंरविचंद्रयोर्मुनेकुलाश्रनैर्वेष्टितमेवकेवलं। प्राकाररूपैरतिरिक्तवर्द्धितैरुच्चैरसं
ख्यप्रमितैःशिखोज्वलैः। पुरंपरयोजनलक्षविस्तृतंत्रिकोटिरत्नेंद्रगृहान्वितंसदा। विराजितंजीवसा
कारनिर्मितैश्चित्रैर्विचित्रैर्विविधैर्मनोहरैः। मणिक्यमुक्तामणिदर्पणार्वृतंनस्वप्नदृष्टाद्विजविश्व
कर्मसुणः। अकल्पमकैःशिवसेवतेजनेनिषेवितंसंततमेवशौनक। सिद्धैर्नियुक्तंशतकोटि
लक्षकैस्त्रिकोटिलक्षैश्चयुतंस्वपार्षदैः। युतंत्रिलक्षैर्विकटैश्चभैरवैःक्षेत्रैश्चतुर्लक्षशतैश्चवेष्टितं
सुरद्रुमैर्वेष्टितमेवसंततंमंदाररत्नप्रवरैःसुपुष्पितैः। विराजितंसुंदरकामधेनुभिर्यथावला
काशतकैर्नभस्थलं। दृष्ट्वामुनिर्विस्मयमाययानसेकिमत्रचित्रंचुयोगिनांगुरौ। लोकंत्रिलोका
चविलक्षणंपरंसामृत्युरोगार्त्तिविजराहरंपरं। दूरेसभामंडलसंस्थितंददर्शतंशिवदंमनोह
रं। पश्चत्रिनेत्रंविधुपंचवक्त्रंगंगाधरंनिर्मलचंद्रशेखरं। प्रतप्तहेमाभजटाधरंशिवंदिगंबरं

॥८५॥

शुद्धमनंतमक्षरं मंदाकिनीपुष्करवीजमालयारुस्मेतिनामैवमुदाजयंतं सुनीलकंठं भुजं
गेंद्रमंडितं योगींद्रसिद्धेंद्रमुनींद्रवंदितं सिद्धेश्वरं सिद्धविधानकारणं मृत्युंजयं कालयमांतका
तकं प्रसन्नहास्यास्यमनोहरं हरं विस्मोहतानामभिवदं वरप्रदं सदास्तुतो षंनवरोषवर्जितं न
कप्रियेंन कृजनैकबंधु गत्वा समीपं मुनिरेव स्तुलिनं ननाम मूर्द्धा पुलकांगविग्रहं वीणां त्रि
तंत्रीक्कणापन्न पुनः पुनर्जगौ चतुष्टावकल्लंसुकवं दृष्ट्वा मुनींद्रप्रवरं च सस्मितं विधेः सुतं वे
दविदां वरिष्टं योगींद्रसिद्धेंद्रमहर्षीभिः सजवेनपीगादवतिष्ठदीश्वरः ददौ च तस्मै मुनये स
संभ्रममालिंगनं चाशिषमासनादिकं पप्रच्छ मद्गंगमने प्रयोजनं तपोधनं तं तपसां च शो
नकं स इत्वसिहासनसुंदरे वरे चोवास शंभुर्वरपार्षदैः सह नोवास सत्वष्टुस्तनयः पुटांजलि ॥८५॥
श्चकार नत्वा प्रणतः प्रभुं द्विजः गंधर्वराजेन कृतेन नारदो वेक्ताःकस्तोत्रेण शुभप्रदेनः स्तु

वा प्रणामं पुनरेव तत्वा नवाज्ञयो वास सनवस्य वामत चकार तत्रैव निवेदनं शिवे मनोभिलाषां न
वकामपूरके श्रुत्वा मुनेस्तद्वचनं कृपानिधिं दूलं प्रतिज्ञां च चकार ओमिति ॥ ॥इति श्री ब्रह्मवै
वर्त्ते महापुराणे ब्रह्मखंडे शंभुनारदमेलनं नाम पंचविंशतितमोऽध्यायः ॥ ॥शौतिरुवाच ॥
॥ ॥हरेस्तोत्रं च कवचं मंत्राध्यानं पूजाविधां परात्परं ययौ चेदे वर्षिध्यानं च ज्ञानमेव च स्तोत्रं च
कवचं मंत्रं ध्यानं विधां पूजाविधानकं तत्वा कृत्नीयं ज्ञानं च ददौ तस्मै महेश्वरः सर्वं प्राप्य मुनिश्रे
ष्टः परिपूर्णमनोरथः उवाच प्रणतो भक्त्या गुरुं प्रणतवत्सलं ॥ नारद उवाच ॥ आह्निकं ब्राह्मणा
नां च वेद वेदविदां वर स्वधर्मपालनं नित्यं यतो भवति निस्तशाः ॥ श्रीमहेश्वर उवाच ॥ उत्थाय ब्रा
ह्ममुहूर्ते ब्रह्मरंध्रस्थपंकजे श्रुभे सहस्रपत्रे च निर्मले ग्लानिवर्जिते रात्रिवासं परित्यज्य गुरुं
तत्रैव चिंतयेत् व्याख्यामुद्राकरं प्रीतं सस्मितं शिष्यवत्सलं प्रसन्नवदनं शांतं परितुष्टं निरंत

॥८६॥

रो साक्षाद्ब्रह्मस्वरूपं च शिष्याणां चितनायकं ॥ ध्यात्वा तदाज्ञामादाय हृत्पद्मे निर्मले सिते ॥ सहस्र
पत्रे विस्तीर्णे देवमिष्टं विचिंतयेत् ॥ यस्य देवस्य यद्ध्यानं यद्रूपं तद्विचिंतयेत् ॥ गृहीत्वा तदनुज्ञां च
कर्त्तव्यं समयोचितं ॥ आदौ ध्यात्वा गुरुं नत्वा संपूज्य विधिपूर्वकं ॥ पश्चात्तदाज्ञामादाय ध्यायेदिष्टं
प्रपूजयेत् ॥ गुरुप्रदर्शितो देवो मंत्रं पूजाविधिर्जप ॥ न देवेन गुरुर्दृष्टस्तस्माद्देवो गुरुः परः ॥ गुरुर्ब्र
ह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुः प्रकृतिरीशाद्या गुरुश्चंद्रानलो रविः ॥ गुरुर्वायुश्च वरुणो
गुरुर्माता पिता सुहृत् ॥ गुरुरेव परं ब्रह्म नास्ति पूज्यो गुरोः परः ॥ ऽभीष्टदेवे रुष्टे च समर्थो रक्षणे
गुरुः ॥ न समर्थो गुरौ रुष्टे रक्षणे सर्वदेवताः ॥ यस्य तुष्टो गुरुस्तस्य जयस्तस्य पदे पदे ॥ यस्य रु
ष्टो गुरुस्तस्य सर्वनाशश्च सर्वदा ॥ न संपूज्य गुरुं देवं यो मूढो पूजयेद्भ्रमात् ॥ ब्रह्महत्याशतं पा ॥८६॥
पं लभते नात्र संशयः ॥ सामवेदे च भगवानित्युवाच हरिः स्वयं ॥ तस्मादभीष्टदेवाद्गुरुः पूज्यः

तमः परं गुरुमिष्टसुरं ध्यात्वा नत्वा च साधको मुने ॥ वेदोक्तं स्थलमासाद्य विण्मूत्रमुत्सृजेन्मुदा ॥ जलं
जलसमीपं च रंध्रं प्राणीसंनिधौ ॥ देवालयसमीपं च वृक्षमूलं च वर्त्म च ॥ हलोत्कर्षस्थलं चैव सस्य
क्षेत्रं च गोष्टकं ॥ नदीकंदरगर्त्तं च पुष्पोद्यानं च पंकिलं ॥ ग्रामाभ्यंतरं चैव तृणाग्रहीसमीपकं ॥ शं
कुसेतुश्शारवनं श्मशानं च वह्निसन्निधिं ॥ क्रीडास्थानं महारण्यं पंचकाधःस्थलं तथा ॥ वृक्षच्छायायु
तं स्थानं मंतप्राण्युपपन्नकं ॥ दुर्वास्थानं कुशस्थानं वल्मीकस्थानमेव च ॥ वृक्षारोपणभूमिं च कार्या
र्थपरिसंस्कृतं ॥ एतत्सर्वं परित्यज्य सुय्यातपविवर्जितं ॥ कृत्वा गर्त्तं पुरीषं च मूत्रं च परिवर्जयेत् ॥
पुरीषमूत्रोत्सर्गं च दिवा कुर्यादुदङ्मुखः ॥ पश्चिमाभिमुखो रात्रौ संध्यायां दक्षिणामुखः ॥ मौनिध
त्वा च निकृत्वा तु लोष्टशौचं च जलशौचं ततः परं ॥ सद्युक्तं तत्कलं चैव - श्रमाणं निशामय ॥ ए
कलिंगे मृदं दद्यात् ~~समहस्ते~~ वामहस्ते च मृद्द्वयं ॥ उभयोर्हस्तयोर्देद्यात् मृद्द्वयं शौचं प्रकीर्त्तितं ॥ मूत्र

॥८७॥

शौचं च द्विगुणं मैथुनानंतरे यदि । मैथुनानंतरं शौचं मूलशौचच चतुर्गुणं । एका लिंगे गुदे तिस्र॰
स्तथा वामकरे दश । उभयोः सप्त दातव्याः पादौ शस्तेन शुध्यति । पुरीषशौचं विप्राणां गृहिणामिद
मेव च । विधवानां च द्विगुणं शौचमेवं प्रकीर्त्तितं । यतीनां वैखानसानां च ब्रह्मर्षेर्ब्रह्मचारिणां । चतुर्गु
णं च गृहिणां तेषां शौच प्रकीर्त्तितं । नयावदुपनीयेत द्विजः शूद्रस्तथांगना । गंधलेपक्षयकरं तेषां
शौचं प्रकीर्त्तितं । शौचं तत्र विशेषश्च व द्वितानां गृहिणां समं । द्विगुणं वैखानसादीनां मुनीनां परिकी
र्त्तितं । न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता । प्रायश्चित्तं प्रसज्येत विहिते तिक्रमे कृते । शौच
मृत्तियमं मतः सावधानो निशाय । मच्छौचेन शुद्धिं विर्विप्रोप्य शुचिरिश्चयतिक्रमे । वल्मीकमू॰ ॥८७॥
षिकोत्खातां मृदमंतर्जलां तथा । शौचावशिष्टां गेहाच्च नादद्याल्लेपसंभवां । अंतःप्राण्यवप
न्नां च हलोत्खातां विशेषतः । कुशमूलोत्थितां चैव दूर्वामूलोच्छितां तथा । अश्वत्थमूलान्नीतां

च तथैव शयनोच्छितां । चतुष्पथानां गोष्ठानां गोपथानां तथैव च । सप्तस्थानं च देवत्राणां सुधाना॰
नां मृदं त्यजेत् । स्नातो वाप्यथवास्नातो विप्रः शौचेन शुध्यति । शौचाहीनोऽशुचिर्नित्यमनर्हः सर्वक
र्मसु । कृत्वा शौचमिदं विप्रो मुखं प्रक्षालयेत्सुधीः । आदौ षोडशगंडूषैर्मुखशुद्धिं विधाय च । दंतका
ष्ठेन दंतं च त्वक्श्वान्परिमार्जयेत् । पुनः षोडशगंडूषैर्मुखशुद्धिं समाचरेत् । तं दमार्जनकाष्ठानां
नियमं शृणु नारद । निरूपितं सामवेदे हरिणा चाह्निकक्रमे । अपामार्गं सिंधुवारमाम्रमेव करं॰
वीरकं । खदिरं च शिरीषं च जातिपुन्नागशालकं । अशोकमर्जुनं चैव क्षीरिवृक्षं कदंबकं । जंबूकं च कू
लं चौदुंपलासं च प्रस्वकं । वदरीपारिभद्रं च मंदारं शाल्मलिं तथा । वृक्षं कंटकयुक्तं च लतादि परिव
र्जितं । पिप्पलं च पियालं च तितिडीकं तालकं । खर्जुरं नारिकेलं च ताली च परिवर्जयेत् । दंतशौ॰
चविहीनाच्चस्य सर्वं शौचविहीनकः । शौचहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । कृत्वा शौचं विप्रो ध्व

८८

स्वाधीतेचवासमी। प्रक्षाल्यपादौआचम्यप्रातःसंध्यांसमाचरेत्। एवंत्रिसंध्यंसाध्यांचकुरुते
कुलजोद्विजः। सस्नातःसर्वतीर्थेषुपश्चिसंध्यांसमाचरेत्। त्रिसंध्यहीनोप्यशुचिरनर्हःसर्वकु
र्मसु। यदन्यत्कुरुतेकर्मनतस्यफलभाग्भवेत्। नोपतिष्ठतियःपूर्वांनोपास्तेयस्तुपश्चिमां। स
शूद्रवद्बहिःकार्यःसर्वस्माद्द्विजकर्मणः। पूर्वांसंध्यांपरित्यज्यमध्यमांपश्चिमांतथा। ब्रह्म
हत्यामात्महत्यांलभतेप्रत्यहंद्विजः। एकादशीविहीनानांसंध्याहीनसमोद्विजः। कल्पंव्रजे
त्कालसूत्रंयथाहिरण्यपालीपतिः। विधायप्रातःसंध्यांचगुरुमिष्टंसुरंरविं। ब्रह्माणमीशंविष्णुं
चमायांपद्मांसरस्वतीं। प्रणम्यगुरुमात्मंचदर्पणंमधुकांचनं। दृष्ट्वास्नानादिकंकालेकुर्या
त्साधकसत्तमः। पुष्करिण्यांतुवापीवापदीस्नानंसमाचरेत्। समुद्धत्यपंचपिंडानादौधर्मवि ८८
चक्षणः। नद्यांनदेकंदरेवातीर्थेवास्नानमाचरेत्। कुर्यात्स्नात्वातुसंकल्पंततःस्नानेपुमा

नमुने। श्रीकृष्णप्रीतिकामश्चवैष्णवानांमहामुने। संकल्पोगृहिणांचैवकृतंपातक‒शनं। वि
प्रकृत्वातुसंकल्पंमृदंगात्रेप्रलेपयेत्। वेदोक्तमंत्रेणानेनदेहशुद्धिकृतेनच। अश्वक्रांतंश्रा
रूह्यममगात्राणिसर्वपापंप्रमोचय। पुण्यंदेहिमहाभागेस्नानानुज्ञांकुरुष्वमां। इत्युक्त्वाचज
लेनाभिप्रमाणेमंत्रपूर्वकं। चतुर्हस्तप्रमाणंचकृत्वामंडलिकांशुभां। तीर्थान्यावाहयेत्तत्रह
स्तंदत्वातपोधन। यानियानिचतीर्थानिसर्वाणिकथयामिते। गंगेचयमुनेचैवगोदावरिसरस्व
ति। नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु। नलिनीभीतामालिनीचमहापथा। विष्णुपादार्घ्य
सम्भूतागंगात्रिपथगामिनी। पद्मावतीभोगवतीस्वर्णरेखाचकौशिकी। दक्षापृथ्वीचवि
हगाविश्वकायाशिवामृता। विद्याधरीसुप्रसन्नाभंतयालोकप्रसादिनी। क्षेमाचवैष्णवीशांताशांति
भोगवतीस्वर्णरेखाचकौशिकी। दक्षापृथ्वीचविहगाविश्वकायाशिवामृता। विद्याधरीसुप्रसदा

। ८९ ।

गोमती--- सती। सावित्री तुलसी दुर्गा महालक्ष्मी सरस्वती। कृष्णप्राणाधिका राधा लोपामुद्रा
दिती रतिः। अहल्यावादितिःसंध्यासंज्ञास्वाहाप्यरुंधती। शतरूपादेवहूतीन्यमरायास्मरेत्सुधीः
। स्मृत्वास्नात्वामहापूनः कुर्यात्तुलकंबुधः बाह्मोमूले ललाटेचकंठदेचवक्षसि। स्नानंदानंतथा
होमंदेवंचपितृकर्मचतत्सर्वंनिष्फलंयातिललाटेतिलकंविना। ब्राह्मणस्तिलकंकृत्वाकुर्यात्
संध्यांचतर्पणं। नमस्कृत्यसुरान्नत्वागृहंगच्छेन्मुदान्वितः। प्रक्षाल्यपादंयत्नेनधृत्वाधौतेच
वाससी। मंदिरंप्रविशेत्प्राज्ञइत्याहहरिरेवच। विनापादौचप्रक्षाल्यस्नात्वाविशतिमंदिरं। तस्य
स्नानादिकंनष्टंजपहोमश्चपंचमः परिधायस्निग्धवस्त्रंगृहेचैत्यविशेद्धरी। रुष्टालक्ष्मीगृ । ८९ ।
हाद्यातिशापं---त्वासुदारुणं। ऊर्द्ध्वजंघश्चयोविप्रःपादौप्रक्षालयेद्यदि तावद्भवतिचांडालो
यावद्गंगांनपश्यति उपविश्यासनेब्रह्मन्नाचम्यसाधकःशुचिः पूजांकुर्यात्तुवेदोक्तांनक्ति

युक्तोहिसंयतः। शालग्राममणौयंत्रेप्रतिमायांजलेचले। गोपृष्ठेवागुरौविप्रेप्रशस्तमर्चनंहरेः
सर्वेषुशस्तापूजाचशाल-ग्रामेचनारद। सुराणामेवसर्वेषांयत्राधिष्ठानमेवसस्नातसर्वती
र्थेषुसर्वयज्ञेषुदीक्षितः। शालिग्रामोदकेनैवयोभिषेकंसमाचरेत्। शालग्रामजलंनत्वानित्य
मश्नातियोनरः जीवन्मुक्तःसचप्रवेषांत्यांतेकृष्णमंदिरं। शालग्रामशिलाचक्रंयत्रतिष्ठतिनार
द। सचक्रोभगवांस्तत्रसर्वतीर्थानिनिश्चितं। तत्रयोहिमृतोदेहीज्ञानाज्ञानेनदैवत। रत्ननिर्मा
णयानेनसयातिश्रीहरेःपदं। शालग्रामेषुनान्यत्रनसाधुपूजयेद्धरिं। कृत्वातत्रहरेःपूजांपरि
पूर्णफलंलभेत्। पूजाधारश्चकथितश्रूयतांपूजनक्रमः। हरेःपूजावृद्धमताकथयामियथा
गमं। कश्चिद्ददातिहरयेचोपचाराणिषोडश। सुंदराणिपवित्राणिनित्यंशक्तिर्भक्तिमूलंचपूज
ने। आसनंवसनंपाद्यमर्घ्यमाचमनीयकं। पुष्पचंदनधूपांश्चदीपंनैवेद्यमुत्तमं। गंधमाल्यंचश

॥५०॥

र्य्यांचललितांसुविलक्षणां । जलमन्नंचतांबूलंसाधारंदेयमेवच । गंधानुलप्यतांबूलविनाशाव्या
णिद्वादश । पाद्यार्घ्यजलनैवेद्यपुष्पाण्येतानिपंचचं । सर्वाण्येतानिमूलेनदद्यात्साधकसत्तमः
गुरूपदिष्टंमूलंचप्रशस्तंसर्वकर्मसु । आदौकृत्वाभूतशुद्धिंप्राणायामंततःपरं । वर्णन्यासविनि
र्वर्त्यचार्घ्यपात्रंविनिर्दिशेत् । त्रिकोणमंडलंकृत्वातत्रकूर्मंप्रपूजयेत् । जलेनपूर्य्यशंखंचतत्र
संस्थापयेद्द्विजः । जलंसंपूज्यविधिवत्तीर्थान्यावाहयेत् । पूर्वोक्तेनोपकरणंतेनजलेनक्षालये
ततः । ततोगृहीत्वापुष्पंचकृत्वायोगासनंशुचिः । ध्यानेनगुरुदत्तेनध्यायेत्कृष्णमनन्यधीः ।
ध्यात्वापाद्यादिकंसर्वंदद्यान्मूलेनसाधकः । अंगप्रत्यंगदेवंचतत्रोक्तंपूजयेद्धरिं । मूलंजप्त्वायथा
शक्तिंदेवमंत्रंसमर्पयेत् । दत्वोपहारंविविधंस्तुत्वाचकवचंपठेत् । ततःकृत्वापरिहारंमूर्द्धा—
नंचप्रणम्यवै । कृत्वातदेवपूजांचयज्ञंकुर्याद्विचक्षणः । श्रौतस्मार्त्तोनियुक्तंचबलिंदद्यात्ततो ॥५०॥

मुने । नित्यसाश्राद्धयथाशक्तिदानंवित्तानुरूपकं । कृत्वाकृत्वाचविहरेत्क्रमएषश्रौतोस्मृतेः । इ
त्येवंकथितंसर्ववेदोक्तंसूत्रमुत्तमं । आह्निकस्यचविप्राणांकिंभूयःश्रोतुमिच्छसि ॥ ॥ इतिश्रीब्र
ह्मवैवर्त्तेमहापुराणेब्रह्मखंडेशिवनारदसंवादेविप्राह्निककथनंनामःषड्विंशोऽध्यायः ॥
॥ ॥ नारदउवाच ॥ भक्ष्यंकिंवाप्यभक्ष्यंचद्विजानांगृहिणांप्रभो । यतीनांवैष्णवानांचविधवा
ब्रह्मचारिणां । किंकर्त्तव्यमकर्त्तव्यं ---- नोऽपमेववा । सर्वंकथयसर्वज्ञसर्वेशासर्वकारण ।
॥ महेश्वरउवाच ॥ कश्चित्तपस्वीविप्रश्चनिराहारीचिरंमुनिः । कश्चित्समीरणाहारीफलाहा
रीचकश्चन । अन्नाहारीयथाकालेगृहीचगृहिणीयतः । येषामिच्छाचयाब्रह्मन्ब्रह्मचारीणांविवि
धागतिः । हविष्यान्नंब्राह्मणानांचप्रशस्तंगृहिणांसदा । नारायणोच्छिष्टमिष्टमनिवेद्यम
भक्ष्यकं । अन्नंविष्ठाजलंमूत्रंयद्विष्णोरनिवेदितं । विण्मुक्तंसर्वपापघ्नमन्नंचहरिवासरे । अ

।९४।

ह्मणः कामतोन्नं च यो भुंक्ते हरिवासरे । त्रैलोक्यजनितं पापं सोपि भुंक्ते न संशयः । न भोक्तव्यं
न भोक्तव्यं न भोक्तव्यं च नारद । गृहाणि ब्राह्मणैरन्नं संप्राप्ते हरिवासरे । गृहीत्वा श्वशाक्तस्य
ब्राह्मणो ज्ञानदुर्बलः । प्रयाति कालसूत्रं च भुक्त्वा च हरिवासरे । कृमिभिः माल्यमानेश्च महि
तस्तत्र तिष्ठति । विण्मूत्रभक्षणं कृत्वा यावदिंद्राश्चतुर्दश । जन्माष्टमीदिने रामनवमीदिव
से हरेः । शिवरात्रौ च यो भुंक्ते सोतो द्विगुणपातकी । उपवासासमर्थश्चेत्फलमूलजलं पिव
त् । नष्टे शरीरे स्वन्नवेदनाया चात्मघातकः । सकृद्भुंक्ते हविष्यान्नं विष्णोर्नैवेद्यमुत्तमं । न नवे
स्तुल्य वा यो सचोपवासफलं लभेत् । एकादश्यामनाहारी गृही विप्रश्च नारद । स च तिष्ठति
वैकुंठे यावद्ब्रह्मणो वयः । गृहाणां शैवभक्तानां मिदमुक्तं च नारद । विशेषतो वैष्णवानां ९४
यतीनां ब्रह्मचारिणां । नित्यं नैवेद्यभोजी यः श्रीकृष्णस्य च वैष्णवः । नित्यं संतोपवासानां

जीवन्मुक्तफलं लभेत् । वांछंति तस्य संस्पर्शं तीर्थानि सर्वदेवताः । आलापं दर्शनं चैव सर्वपाप
प्रणाशनं । हिः स्विन्नमन्नं दृष्टं पुकं स्युद्दं देशविशेषके । नास्यं तशाल्नविप्राणां भक्षणे च निवेदने । अ
भक्तं च यतीनां च विधवा ब्रह्मचारिणां । तांबूलं च यथा ब्रह्मं संमथेत दस्तुनो ध्रुवं । तांबूलं विधवास्त्री
णां यतीनां ब्रह्मचारिणां । तपस्वीनां च विप्रेंद्र गोमांससदृशं स्मृतं । सर्वेषां ब्राह्मणानां चैवान्नद्रव्यं
ष्टेणु नारद । यदुक्तं सामवेदे च हरिणा चाह्निकक्रमे । ताम्रपात्रे पयोपानमुच्छिष्टे घृतभोजनं । दु
ग्धं लवणमार्द्रं च सद्यो गोमांसभक्षणं । नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु । एतद्वं ताम्रपात्र
स्थं सुरत्वं न संशयः । छाप्य वामहस्तेन यत्तोयं पिबंति द्विजः । सुरापी तिस विज्ञेयः सर्वधर्मवहि
ष्कृतः । अनिवेद्यं हरेरन्नं भक्ष्यं शोषं च निस्पृशः । पानशोषजलं चैव तु गोमांससदृशं मुने । वाति
गनं फलं चैव गोमांसं कार्तिके स्मृतं । माघे च मूलकं चैव कलंबी शायने तथा । स्वेतवर्णं च तालं च

॥९२॥

मसूरं मत्स्यमेव च॥ सर्वेषां ब्राह्मणानां च त्याज्यं च सर्वदेशतः॥ मत्स्यांश्च कामतो भुक्त्वा सोपवासस्त्र्यहं
वसेत्॥ प्रायश्चित्तं ततः कृत्वा शुद्धिमाप्नोति ब्राह्मणः॥ प्रतिपत्सु च कुष्मांडमभक्ष्यमर्थनाशनं॥
द्वितीयायां तु वृहती भोजको न स्मरेद्धरिं॥ अभक्ष्यं च पटोलं च शत्रुवृद्धिकरं परं॥ तृतीयायां चतुर्थ्यां
च मूलकं धननाशकं॥ कलंककारणं चैव पंचम्यां बिल्वभक्षणं॥ तिर्य्यग्योनिप्रापयेत्तु षष्ठ्यां च
निबभक्षणं॥ रोगवृद्धिकरं चैव सप्तम्यां तालभक्षणं॥ नारिकेलफलं भक्ष्यमष्टम्यां बुद्धिना-
शनं॥ तुंबी च नवम्यां गोमांसं दशम्यां च वार्त्ताकीभक्षणे पुत्रनाशनं॥ चतुर्दश्यां मांसभक्ष्यं महा-
पापकरं परं॥ पंचदश्यां तथा मांसं भक्ष्यं च गृहिणां मुने॥ गृहिणां प्रोक्षितं मांसं भक्ष्यमन्यद- ९२
दिनेषु च॥ प्रातःस्नाने तथा श्राद्धे पारणे व्रतवासरे॥ प्रशस्तं शार्षपं तैलं पक्वतैलं च नारद
कुहूपूर्णेंदुसंक्रांतिचतुर्दश्यष्टमीषु च॥ रवौ श्राद्धे व्रताहे च दुष्टं स्यात्तिलतैलकं॥ मांसं च र-

क्तशाकं च कांस्यपात्रे च भोजनं॥ निषिद्धं शयने चैव कूर्ममांसं च प्रोक्षितं॥ निषिद्धं सर्ववर्णानां दि-
वास्त्रीनिषेवनं॥ रात्रौ च दधिभक्तं च शयनं संध्ययोर्दिने॥ रजस्वलास्त्रीगमने तन्नु रकका-
रणं॥ रजस्वलावीरान्नं च पुंश्चल्यन्नमभक्ष्यकं॥ शूद्राणां जातकानां च शूद्रश्राद्धान्नमेव च॥ अ-
भक्ष्यमेव विप्रस्य यच्चान्नं वृषलीपतेः॥ ब्राह्मणं वार्द्धुषिकान्नं च गणकान्नमभक्ष्यकं॥ अग्रदानी द्विजा- न
न्नं च चिकित्साकारकस्य च॥ हस्ताचित्राहरौ तैलमशस्यं चाप्यभक्षणीयकं॥ मूले मृगे भाद्रपदे
मांसं गोमांसतुल्यकं॥ मघायां कृत्तिकायां वै उत्तरासु च नारद॥ करोति मैथुनं यो हि कुंभीपा-
कं च स व्रजेत्॥ रोहिण्यां च विशाखायां मैत्रे चैवोत्तरासु च॥ मघायां कृत्तिकायां च द्विजः क्षौरं विव-
र्जितं॥ कृत्वा तु मैथुनं क्षौरं यो देवांस्तर्पयेन्नरः॥ रुधिरं लद्भवेत्तोयं दाता च नरकं व्रजेत्॥ यत्क-
र्त्तव्यमकर्त्तव्यं यद्भोग्यमभोग्यकं॥ सर्वं तु त्वं निगदितं किं भूयः श्रोतुमिच्छसि॥ ॥इति ५

॥८३॥

श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखंडे शिवनारदसंवादे कर्त्तव्याकर्त्तव्यप्रकथनं नामे विंशति नम
तमोध्यायः॥ ॥नारद उवाच॥ ॥श्रुतं सर्वं जगन्नाथ त्वत्प्रसादाज्जगद्गुरो॥ भवान् ब्रह्मस्व
रूपश्च वद ब्रह्मनिरूपणं॥ प्रभो किं ब्रह्म साकारं किं निराकारमीश्वर॥ किं तद्विशेषणं किं
वाप्यविशेषणमेव च॥ किं वा दृश्यमदृश्यं वा लिप्तं देहेषु किं न वा॥ किं वा तल्लक्षणं शास्त्रे वे
दे वा किं निरूपणं॥ ब्रह्मातिरिक्ता प्रकृतिः किं वा ब्रह्मस्वरूपिणी॥ प्रकृतेर्लक्षणं किं वा सा
रभूतं श्रुतौ श्रुतं॥ कस्माद्दृष्टौ च प्राधान्यं द्वयोर्मध्ये वरं परं॥ विचार्य मनसा सर्वं सर्वज्ञ वद
मां ध्रुवं॥ नारदस्य वचः श्रुत्वा पंचवक्त्रः प्रहस्य च॥ भगवान् वक्तुमारेभे परं ब्रह्मनिरूपणं॥ ॥८४॥
॥महेश्वर उवाच॥ यद्यत्पृष्टं त्वया वत्स निगूढं ज्ञानमुत्तमं॥ सुदुर्लभं च वेदेषु पुराणेषु च ना
रद॥ अहं ब्रह्मा च विष्णुश्च शेषो धर्मो महाविराट्॥ सर्वे निरूपितं ब्रह्मनाम्नाभिः श्रुतिभि

र्वा॥ यद्विशेषेण युक्तं च दृश्यं प्रत्यक्षमेव च॥ तन्निरूपितवान्निर्वेदे वेदविदां वरैः॥ वैकुं
ठे च पुरा दृष्टो धर्मेण ब्रह्मणा मया॥ यदुवाच हरिः किंचित्तन्निबोध कथयामि ते॥ सारभूतं च तत्त्वा
नामज्ञानांधकलोचनं॥ द्वैधभ्रमतमोध्वंसं सम्यक्प्रकृष्टप्रदीपकं॥ परमात्मस्वरूपं च परं ब्रह्म
सनातनं॥ सर्वदेहस्थितं साक्षिस्वरूपं देहिकर्मणां॥ प्राणाः पंचस्वयं विष्णुर्मनो ब्रह्मा प्रजा
पतिः॥ सर्वज्ञानस्वरूपोहं शक्तिः प्रकृतिरीश्वरी॥ आत्माधीना वयं सर्वे सर्वे स्थिते स्थिताश्च संस्थि
ता गते गताश्च म—उ नरदेवमिवानुगाः॥ जीवस्तत्प्रतिबिंबश्च भवभोगी च कर्मणां॥ य
थार्कचंद्रयोर्बिंबो जलपूर्णघटेषु च॥ बिंबो घटेषु भग्नेषु प्रलीनश्चंद्रसूर्ययोः॥ यथा सृष्टौ
च भग्नायां जीवो ब्रह्मणि लीयते॥ एकमेव परं ब्रह्म शेषे तत्सनवत्यये॥ वयं प्रलीनास्तत्रैव
तु जगदेतच्चराचरं॥ तत्त्वज्योतिः स्वरूपं च मंडलाकारमेव च॥ ग्रीष्ममध्याह्नमार्त्तंडको

।८कोटिसमप्रभं आकाशमिवविस्तीर्णंसर्वव्यापकमव्ययं सुखदृश्यंयथाचंद्रबिंबं
योगिभिरेवच वदंतियोगिनस्तत्तुपरंब्रह्मसनातनं दिवानिशंचध्यायतेसत्यंतत्सर्वमं
गलं निरीहंचनिराकारंपरमात्मानमीश्वरं स्वेच्छामयंस्वतंत्रंचसर्वकारणकारणं॥
परमानंदरूपंचसर्वस्यानंदकारणं परंप्रधानंपुरुषंनिर्गुणंप्रकृतेःपरं तत्रैवली
नाप्रकृतिःसर्वबीजस्वरूपिणी॥ यथाग्नौदाहिकाशक्तिःप्रभासूर्येयथामुने॥ यथादु
ग्धेचधावल्यंजलेशैत्यंयथैवच यथाशब्दश्चगगनेयथागंधःक्षितौसदा॥ यथाहि
निर्गुणंब्रह्मनिर्गुणाप्रकृतिस्तथा सृष्टोन्मुखेचतद्ब्रह्मसांशेनपुरुषःस्मृतः॥ सर्वे अर्द्ध॥
णसगुणोब्रह्मप्राकृतोविषयीस्मृतः॥ साचतत्रैवनिर्गुणापरास्वेच्छामयीस्मृता॥ यथा
मृदाकुलालश्चघटंकर्तुंक्षमःसदा॥ तदंशात्प्रकृत्यातद्ब्रह्मसृष्टौक्षमामुने॥ स्वर्णे

नकुंडलंकर्तुंस्वर्णकारःक्षमोयथा॥ तथाब्रह्मतयासार्द्धंसृष्टिंकर्तुंमहेश्वरः॥ कुलालसृष्टे
नचमृन्नित्याएवसनातनी॥ नचस्वर्णकारसृष्टंतत्स्वर्णंनित्यमेवच॥ नित्यंतत्त्वचनंब्रह्म
नित्याचप्रकृतिःस्मृता॥ द्वयोःसमंचप्राधान्यमितिकेचिद्वदंतिहि॥ मृदंस्वर्णंसमाहर्तुं
कुलालःस्वर्णकारको॥ समर्थौनचमृत्स्वर्णंतयोराहरणेक्षमं॥ तस्मात्तद्ब्रह्मप्रकृतेःपर
मेवहिनारद॥ इतिकेचिद्वदंत्येवद्वयोश्चनित्यताध्रुवं॥ केचिद्वदंतितद्ब्रह्मस्वयंचप्रकृ
तिःपुमान्॥ ब्रह्मातिरिक्ताप्रकृतिर्नवदंतीतिकेचन॥ तद्ब्रह्मपरमंधाममसर्वकारणका
रणं॥ तद्ब्रह्मलक्षणंब्रह्मन्निर्दिंकिंचितश्रुतौश्रुतं॥ ब्रह्मचात्माचसर्वेषांनिर्लिप्तंसाक्षि
रूपिणं॥ सर्वव्यापिचसर्वादिलक्षणंचश्रुतौश्रुतं॥ तब्रह्मशक्तिःप्रकृतिःसर्वबीजस्व
रूपिणी॥ यतस्तच्छक्तिमद्ब्रह्मचेदंप्रकृतिलक्षणं॥ तेजोरूपंचतद्ब्रह्मध्यायतेयोगि

..नदा । वैष्णवास्तन्नमन्यंते तद्भक्ताः सूक्ष्मबुद्धयः । तत्तेजः कार्य्यं वा कार्य्यं ध्येयं च पुरुषं
विना । कारणं विना कार्य्यं कुतो वा प्रभवेद्भुवि । ध्यायंते वैष्णवास्तस्मात्तत्र रूपं मनोहरं ।
स्वेच्छामयस्य पुंसश्च मांसाकारस्यात्मनः सदा । तत्तेजो मंडलाकारे सूर्य्यकोटिसमप्रभे
नित्यं स्थलं च प्रत्नं गोलोकाख्यमिदमेव च । लक्षकोटियोजनं च चतुरस्रं मनोहरं । सुद्द
रूपं वर्त्तुलाकारं तथैव चंद्रमंडलं । रत्नेंद्रसारनिर्माणं निराधारं च स्वेच्छया । ऊर्द्धं च नित्यं
वैकुंठात् पंचाशत्कोटियोजनं । गोगोपगोपीसंयुक्तं कल्पवृक्षसमन्वितं । कामधेनुभि
राकीर्णं रासमंडलमंडितं । वृंदारण्यवनाच्छन्नं विरजवाशोभितं मुने । शतशृंगशतैः शृंगैः
सदाश्रेदाश्रमीश्रितं । लक्षकोटिपरिमितैराश्रमैः सुमनोहरैः । रत्नेंद्रसारनिर्माणैर्गोपी ९५
नामविराजितं । शतमंदिरसंयुक्तमाश्रमं सुमनोहरं । रत्नप्राकारपरिखविचित्रेण

विराजितं । अमूल्यरत्ननिर्माणैः लक्षमंदिरसुंदरं । आश्रमं चतुरस्रं च चंद्रबिंबाकृतं शुभं
गोलोकमध्यदेशस्थमतीवसुमनोहरं । प्राकारपरिखायुक्तं पारिजातवनान्वितं । कौस्तुभेंद्र
णमाणिक्यनानानिर्माणकलसोज्ज्वलैः । हीरासारविनिर्माणसोपानघनसुंदरैः । मणींद्रसारनि
र्माणकपाटदर्पणान्वितैः । नानाविचित्रविचित्राद्र्याश्रमं च सुसंस्कृतं । षोडशद्वारसंयुक्तं सु
प्रंरत्नदीपकैः । तत्र सिंहासने रम्ये चामूल्यरत्ननिर्मिते । नानाचित्रविचित्राढ्ये वसंतमीश्वरं वरं
। नवीननीरदश्यामं किशोरवयसं शुभं । शरन्मध्याह्नराजीवप्रभामोचनलोचनं । शरत्पा
र्वणपूर्णेंदुशोभाच्छादनमाननं । कोटिकंदर्पलावण्यलीलानिंदितसुंदरं । कोटिचंद्रप्रभामुष्ट
पुष्टश्रीयुक्तविग्रहं । सस्मितं मुरलीहस्तं सुप्रशान्तं सुमंगलं । वह्निसंस्कारपीतांशुयुग
लेन समुज्ज्वलं । चंदनोक्षितसर्वांगकौस्तुभेन विराजितं । आजानुमालतीमाला वनमालावि

भूषितं त्रिभंगं भंगिमायुक्तं मुक्तामाणिक्यभूषितं मयूरपुच्छचूडं च सद्रत्नमुकुटोज्वलं
रत्नकेयूरवलयरत्नमंदीररंजीतं रत्नकुंडलयुक्तेन गंडस्थलविराजितं मुक्तापंक्ति
विनिंदैकदशनं सुमनोहरं पक्वबिंबाधरोष्टं च नासिकोन्नतशोभनं वीक्षितं गोपीका
भिश्च वेशतानिश्चसंततं स्थिरयौवनयुक्तानिसस्मितानिष्करकं भूषितानिश्चसद्र
त्ननिर्माणभूषणेन च सुरेंद्रश्च मुनींद्रश्च सततनिर्मानवेदकैः ब्रह्मविष्णुशिवानंतब्रह्मा
द्यैर्वंदितं सदा एवंरूपमरूपं तं ध्यायंते वैष्णवा मुने सततं ध्येयमस्माकं परमात्मानमी
श्वरं अक्षरं परमं ब्रह्म भगवंतं सनातनं स्वेच्छामयं निर्गुणं च निरीहं प्रकृतेः परं सर्वसा
रं सर्वबीजं सर्वज्ञं सर्वमेव च सर्वेश्वरं सर्वपूज्यं सर्वसिद्धिवरप्रदं सर्वभगवानादिर्गोलोके ऐद्दी
द्विभुजः स्वयं गोपवेशश्च गोपालैः पार्षदैः परिवेष्टितः परिपूर्णतमः श्रीमान् श्रीकृष्णो

राधिकेश्वरः ॥ सर्वांतरात्मा सर्वत्र प्रत्यक्षः सर्वसम्मतः ॥ कृषिश्च सर्ववचनो णकारश्चात्मवा
चकः ॥ सर्वात्मा च परं ब्रह्म तेन कृष्णः प्रकीर्तितः ॥ कृषिश्च सर्ववचनो णकारश्चादिवाचकः ॥ स
र्वादिपुरुषो व्यापी तेन कृष्णः प्रकीर्तितः ॥ स एवांशेन भगवान् वैकुंठे च चतुर्भुजः ॥ चतुर्भुजैः
पार्षदैर्देवैरावृतः कमलापतिः ॥ स एव कलया विष्णुः पाता च जगतां पतिः ॥ श्वेतद्वीपे सिंधु
कन्यापतिरेव चतुर्भुजः ॥ एतत्ते कथितं सर्वं परं ब्रह्मनिरूपणं ॥ अस्माकं चिंतनीयं च सेव्यं वं
दितमीप्सितं ॥ इत्युक्त्वा शंकरस्तत्र विरराम च शौनक ॥ गंधर्वराजो कृष्णस्तोत्रेण तुष्टाव तं च नार
दः ॥ मुनिस्तोत्रेण संतुष्टो भगवानादिरच्युतः ज्ञानं मृत्युंजयस्तस्मै प्रददौ वरमीप्सितं ॥ तं
प्रणम्य मुनींद्रस्य प्रहृष्टवदनेक्षणं तदाज्ञया पुण्यरूपं ययौ नारायणाश्रमं ॥ ॥ इति
श्रीब्रह्मवैवर्त्ते महापुराणे ब्रह्मखंडे नारदप्रस्थानं नाम अष्टाविंशतितमोऽध्यायः ॥ ॥ सो

।नरुवाच॥ ॥ददर्शाश्रममाश्चर्य्यं देवर्षीनारदस्तथा॥ श्रेष्ठं नारायणस्यैव वदरीवन
संयुतं नानावृक्षलताकीर्णं पुंस्कोकिलरुतंयुतं वारनेंद्रैः केसरीन्द्रैर्व्याघ्रै र्भेश्च विरा
जितं इषिद्रस्य प्रभावेन हिंसायुविवर्जितं महारण्येमगम्यं च स्वर्गाधिकमनोहरं सि
द्धेन्द्राणां महर्षीन्द्राणामाश्रमाणां त्रिकोटिभिः आवृतं चंदनारण्य पारिजातवनान्वि
तं ददर्शात महर्षीन्द्रं च समनामध्ये मनोहरं त्रिषष्ठीकोटिसिद्धेन्द्रैर्मारावृतं सुर्य्यवर्चसं
महर्षीन्द्राणां च पंचाशत्कोटिभिश्चान्वितं मुदा विद्याधरीणां नृत्यं च पश्यंतं सस्मितद्वि
जं गंधर्वकृष्णसंगीतं श्रुतवंतं मनोहरं रत्नसिंहासने रम्ये वसंतं योगिनां गुरुं जं
पंतं परमं ब्रह्म कृष्णमात्मानमीश्वरं प्रणनाम च तं दृष्ट्वा ब्रह्मपुत्रश्च शौनक उत्थाय ॥९७॥
सहसालिंग्य पुपुजे परमाशिषं प्रपच्छ कुशलं स्नेहाच्च कृतश्चातिथिपूजनं रत्नसिं

हासने रम्ये वासमासनारदं निरवसन्नासने रम्ये वर्त्मश्रमविवर्जितं उवाच तं महर्षिश्रेष्ठं भ
गवंतं समाम्नातनं ॥नारद उवाच॥ अधीत्य वेदान्सर्वांश्च पितुः सुदुर्गमेनापि ज्ञानं संप्राप्य
योगीन्द्रात् मंत्रं च शंकराद्विभो मनो मे न हि तृप्नोति दुर्निवारं च चंचलं दृष्ट्वा मयात्वमादाच्च
मनसा प्रेरि न च किंचिज्ज्ञान विशेषं च लब्धुमिच्छामि सांप्रतं यत्र ब्रह्मगुणाख्यातं जन्मम
त्युजरापहं अप्यविमुक्तिवाधाश्च सुरेन्द्राश्च सुराविभो किंचिन यंतिमुनयो मनसश्च विचक्ष
णाः कस्मात्सृष्टिश्च प्रभवेत् कुत्र वा प्रविलीयते कोवा सर्वेश्वरेशश्च सर्वकारणकारकः
।तस्येश्वरस्य किंरूपं कर्म वा किं जगत्पते विचार्य मनसा सर्वं तद्भवान्वक्तुमर्हति नारद
स्य वचः श्रुत्वा प्रहस्य भगवानृषिः कथां कथयितुमारेभे पुण्यां भुवनपावनीं॥ ॥इति श्री ब्र
ह्मवैवर्त्ते महापुराणे ब्रह्मखंडे नारायणनारदसंवादे नारदप्रश्नो नामैकोनत्रिंशोऽध्यायः॥

नारायणउवाच॥ ॥लंबोदरोहरिकमलापतिरेवशेषोब्रह्मादयः सुरगणामनवो
मुनींद्राः वाणीशिवात्रिपथगाकमलादिकायासंचिंतयेद्भगवतश्चरणारविंदं॥ संसा
रसागरेऽतिमतीवगभीरघोरं दंभादिसर्पपरिवेष्टितवेष्टितांगं॥ सलंघ्यगंतुमनिवांछति
योहिदास्यंसंचिंतयेद्भगवतश्चरणारविंदं वेदांगवेदमुखनिःसृतकीर्त्तिराशेर्वेदांग
वेदजनकस्यविधेर्विधातुः॥ जन्मांतकादिभयशोकविदारणेदेहःसंचिंतयेद्भगवतश्च
रणारविंदं॥ गोपांगवर्द्धनोहरणकीर्त्तिबलीबाखिचत्रूरमासदशावाग्रकृणेनकिंवा॥
विस्तानिलोमविवरेषुमनुत्तुरीदंःसंचिंतयेद्भगवतश्चरणारविंदं॥ गोपांगणानावदन
पंकजषट्पदस्यरासेस्वरस्यरसिकानरणास्यपुंसः॥ वृंदावनेविहरतोव्रजवेशविस्मोः
संचिंतयेद्भगवतश्चरणारविंदं॥ चक्षुनिमेषपतितोजगतांविधातातत्कर्मवत्सकथितं ॥९८॥

नुविकःसमर्थः॥ त्वंचापिनारदमुनेपरमादरेणसंचिंतयेद्भगवतश्चरणारविंदं॥ यूयंवयं
यस्यकलाकलांशाःकलांशामनवोमुनीन्द्राः॥ कलाविशेषामवपाद्यमुख्यामहान्विराड्यस्य
कलाविशेषः॥ सहस्रशीर्षाःशिरसःप्रदेशोविसर्गेसिद्धार्थसमंचविश्वं॥ कूर्मेशाशेषोमश
कोगजेवयथाकूर्मश्चकृष्णस्यकलाकलांशाः॥ गोलोकनाथस्यविभोर्यशोमलंश्रुतोपुराणे
नहिकिंचनस्फुटं॥ नपाद्यमुख्याःकथितुंसमर्थासर्वेश्वरंतंभजयाद्यपुत्र॥ सर्वेषुविश्वेषुच
विश्वधाम्नःसंत्येवब्रह्मविष्णुशिवादिरूपाःतेषांचसंख्यांश्रुतयश्चदेवाः॥ परंनजानंतितमि
श्वरंभज॥ करोतिसृष्टिंसविधेर्विधातायन्नित्यांप्रकृतिंजगत्प्रसुं॥ ब्रह्मादयःप्राकृतकाश्चसर्वे
भक्तिप्रदात्रींप्रकृतिंभजस्व॥ ब्रह्मस्वरूपाप्रकृतिर्नभिन्नायथाचसद्दृशीकुरुतेसनातनः॥ स्त्रि
... पर्वाःकलयाः ... यामाचसर्वेचतयाविमोहिताः॥ नारायणीसापरमासनातनी

...वतु सः परम...नश्च ॥ आत्मेश्वरस्यापि यमा च शक्तिमांस्तया विना सुं मशक्त एव
च गत्वा विवाहं कुरु वत्स सांप्रतं कर्त्तुं प्रयुक्तं च पितुर्निदेशं ॥ गुरोर्निदेशं प्रतिपालको
न वे सर्वत्र पूज्यो विजयी च संततं ॥ सपत्नीं पूजयेद्योषिद्वस्त्रालंकारचंदनैः ॥ प्रकृतिस्त
स्य संतुष्टा यथा कृष्णोजद्विजार्चने ॥ सा च योषित्स्वरूपा च प्रतिबिंबेषु मायया ॥ योषिता
मपमानेन पराभूता च सा भवेत् ॥ दिव्यास्त्री पूजिता येन च पतिपुत्रवती सती ॥ प्रकृतिः
प्रजिता येन सर्वमंगलदायिनी ॥ मूलप्रकृतिरेका सा पूर्णब्रह्मस्वरूपिणी ॥ सृष्टा पंचवि
धा सा च विष्णुमाया सनातनी ॥ प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः ॥ सर्वासां प्रेय
सीकांता सा राधा परिकीर्तिता ॥ नारायणप्रिया लक्ष्मीः सर्वसंपत्स्वरूपिणी ॥ वागधिष्ठा ॥९९॥
तृदेवी या सा च पूज्या सरस्वती ॥ सावित्री वेदमाता च पूज्यं रूविधेः प्रिया ॥ शंकरस्य प्रिया

दुर्गा यस्याः पुत्रो गणेश्वरः ॥ ॥इति श्रीब्रह्मवैवर्ते महापुराणे नारायणनारदसंवादे ब्र
ह्मखंडे ब्रह्मप्रशंसाप्रसंगप्रकृतिप्रशंसा नाम त्रिंशत्तमोध्यायः ॥ ॥समाप्त ॥ ॥

१६०